लोकप्रियशास्त्रीयग्रन्थमाला - ४

# ध्वनिमीमांसा

( ध्वनिविरोधिसिद्धान्तपरिशीलनसन्दर्भे )


लेखकः

रमेशकुमारपाण्डेयः

# भूमिका

यदपि तदपि रम्यं यत्र लोकस्य किञ्चित्
स्फुरितमिदमितीयं बुद्धिरभ्युज्जिहीते।
अनुमतमपि पूर्वच्छायया वस्तु तादृक्
सुकविरुपनिबध्नन् निन्द्यतां नैव याति।।

प्रतायन्तां वाचो निमितविविधार्थामृतरसा
न वादः कर्तव्यः कविभिरनवद्ये स्वविषये।
परस्वादानेच्छाविरतमनसो वस्तु सुकवेः
सरस्वत्येवैषा घटयति यथेष्टं भगवती।।

काव्ये सारभूतं तत्त्वं किमिति जिज्ञासमानाः समीक्षकाः काव्यं सूक्ष्मातिसूक्ष्मं परिशीलयन्ति स्थापयन्ति च स्वसिद्धान्तान्। मुनिना भरतेन नाट्यस्य प्रमुखं तत्त्वं समुद्घोषयता प्रोक्तं यत्- नहि रसादृते कश्चिदर्थः प्रवर्तते इति। तदुत्तरवर्त्तिना भामहेन निर्भूषं कान्तमपि वनिताननमिवालङ्काररहीनं काव्यं कथमपि न शोभत इत्यभाणि। भामहस्य सिद्धान्तं परिपोषयन्तो दण्डि-रुद्रटोद्भट्टादय आलङ्कारिकाः काव्येऽलङ्कारमेव सारभूतत्वेन समुद्घोषितवन्तः। गुणवादी वामनस्तु रीतिमेव काव्यात्मत्वेन प्रख्यापितवान्। ततः परम् आनन्दवर्धनाचार्येण काव्योपस्कारकाणां सर्वेषां तत्त्वानां यथायोगं विनियोगं विदधता काव्यतत्त्वप्रकाशिकां शब्दशक्तिं समाश्रित्य अभिधालक्षणाभ्यां विलक्षणया व्यञ्जनाख्यया शब्दशक्त्या सहृदयानुभवगम्यो ध्वनिरेव काव्यात्मत्वेन सिद्धान्तितः। ध्वननात्मके प्रधानीभूते रसतत्त्वे प्रीतिं दधाना अपि केचनाचार्याः व्यञ्जनां प्रत्याख्यातवन्तः। ते समीक्षका एव ध्वनिविरोधिन इति व्यवहारः समीक्षकेषु। व्यञ्जनां प्रत्याख्याय ते स्वसिद्धान्तानुसारम् अभिधया, लक्षणया, तात्पर्यया अनुमित्या वा काव्यसर्वस्वस्य प्रकाशनं स्वीकुर्वन्ति। एतेषां ध्वनिविरोधिनां सिद्धान्तानां समीक्षणं विधाय ध्वनिसिद्धान्तस्य प्रतिपादनमेव मूलमुद्देश्यं ग्रन्थस्यास्य।

# विषयानुक्रमणिका

## प्रथमो भागः - ध्वनिसिद्धान्तः


| | | |
|---|---|---|
| १. | ध्वनिसिद्धान्तः | |
| २. | व्यञ्जनाव्यापारः | ७ |
| ३. | ध्वनिविरोधिनः | ८ |
| ४. | अभाववादः | ९ |
| ५. | आचार्यभामहः | ११ |
| ६. | आचार्यदण्डी | १३ |
| ७. | आचार्यवामनः | १३ |
| ८. | आचार्योद्भटः | १४ |
| ९. | आचार्यरुद्रटः | १५ |
| १०. | भाक्तवादः | १७ |
| ११. | अशक्यवक्तव्यत्ववादः | १९ |
| **ध्वनिपरम्परायां प्रमुखा आचार्याः** | | **२१** |
| | आचार्यआनन्दवर्धनः | २१ |
| | आचार्यअभिनवगुप्तपादः | २४ |
| | आचार्यमम्मटभट्टः | २८ |
| | आचार्यकविराजविश्वनाथः | ३१ |
| | आचार्यपण्डितराजजगन्नाथः | ३२ |

## मुख्यश्चतुर्विधः

मुख्यामुख्यत्वेनाभिधालक्षणयोः स्वरूपं प्रतिपाद्य मुख्याभिधाव्यापारस्य भेदचतुष्टयं तेन व्याहृतम्।

**'तत्र मुख्यश्चतुर्भेदो ज्ञेयो जात्यादिभेदतः।'[१]**

अर्थात् जात्यादिभेदतो मुख्यार्थश्चतुर्विधो भवति। 'चतुष्टायी शब्दानां प्रवृत्तिरिति महाभाष्यकार-वचनमादाय जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः, यदृच्छाशब्दाः व्यक्तेरुपाधिरूपेणाङ्गीकृतास्तेन। उपाधिधर्मेणैव शब्दानां परस्परं भिन्नविषयत्वप्रतीतिरिति व्याहरता तेन उपाधयः सविशेषं परामृष्टाः। उपाधिस्तु द्विविधः- वक्तृसंनिवेशितः वस्तुधर्मश्च। वक्तृसंनिवेशितो यथा- 'डित्थादीनां शब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपम्। तत् खलु तां तामभिधाशक्ति-मभिव्यञ्जयता वक्त्रा यदृच्छया तस्मिंस्तस्मिन् संज्ञिनि उपाधितया संनिवेश्यते। अतः तन्निबन्धना यदृच्छाशब्दा डित्थादयः।' वस्तुधर्मोपि द्विविधः साध्यः सिद्धश्च। साध्योपनिबन्धनास्तत्र क्रियादिशब्दाः, यथा पचतीति। सिद्धोऽपि द्विविधः जातिगुणभेदात्। कस्यचित् खलु सिद्धस्योपाधेः पदार्थस्य प्राणप्रदता, यथा जातेः। न हि कश्चित् पदार्थो जातिसम्बन्धमन्तरेण स्वरूपं प्रतिलभते, अत्र प्रमाणत्वेन तेन वाक्यपदीयस्य पङ्क्तिः गोत्वाभिसम्बन्धात्तु गौः इति। गुणस्तु कश्चित्पुनरुपाधिलब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुः यथा शुक्लादिर्गुणः। न हि शुक्लादेर्गुणस्य पटादिवस्तुस्वरूपप्रतिलम्भनिबन्धनत्वम्, जातिमहिम्नैव तस्य वस्तुनः प्रतिलब्धस्वरूपात्। अतोऽसौ लब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुः। तदेवं प्राणप्रदोपाधिनिबन्धनत्वं यस्य शब्दस्य स जातिशब्दः यथा गवादिः यस्माल्लब्धस्वरूपस्य वस्तुनो विशेषाधानहेतुरर्थः प्रतीयते स गुणशब्दो यथा शुक्लादिः।

मुकुलभट्टेन जातिवादिनां पक्षः भृशं दूषितः। तेनोक्तं यत् सर्वेषां गुणक्रियायदृच्छाशब्दानां जातिनिबन्धनत्वं यत्केषाञ्चिदभिमतं तत्तु न युक्तियुक्तम्। यतो हि 'गुणक्रियाशब्दसंज्ञिव्यक्तीनामेव तत्तदुपाधिनिबन्धनभेदजुषामेकाकारता-

---

१. अ. वृ. मा. २

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली